# INDIAN SCHOOL AL WADI AL KABIR

| Class: VII- 2nd Lang. | Department: Sanskrit | Date of submission: N.A |
|---|---|---|
| Worksheet no. 4 | Topic : अपठित-अवबोधनम् | Note: Pl. file in portfolio |

**1. अधोलिखितम् अनुच्छेदम् पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

कस्मिंश्चित् वने कपोतानाम् एकम् दलम् वसति स्म। एकः वृद्धः कपोतः दलस्य नेता संरक्षकश्च आसीत्। प्रतिदिनम् कपोताः अरण्ये दानान् अन्विष्यन्ति उदरपूर्तिम् च कुर्वन्ति स्म। एकदा एकः व्याधः तत्रागतः। आकाशे अनेकान् कपोतान् वीक्ष्य सः अतीव प्रसन्नः अभवत्, सोऽचिन्तयत्-अहो सौभाग्यम्। परम् इदानीम् तु सायंकालः सञ्जातः किम् करोमि । अस्तु, श्वः इह आगत्य तण्डुलकणान् विकिरिष्यामि। विपुल तण्डुलराशिम् दृष्ट्वा एते कपोताः भूमौ अवतरिष्यन्ति । तस्मिन् एव काले अहम् सर्वान् कपोतान् जालबद्धान् करिष्यामि।

**क. एकपदेन उत्तरत्त।**

(i) एकदा तत्र कः आगतः ?

(ii) केषाम् दलम् वने वसति स्म ?

(iii) व्याधः कान् दृष्ट्वा प्रसन्नः अभवत् ?

(iv) कपोताः कुत्र अवतरिष्यन्ति ?

**ख. पूर्णवाक्येन उत्तरत।**

(i) व्याधः किमर्थम् प्रसन्नः अभवत् ?

(ii) व्याधः तण्डुलकणान् विकीर्य किम् कर्तुम् इच्छति स्म ?

**ग. यथानिर्देशम् उत्तरत।**

(i) 'अरण्ये' पदे का विभक्तिः ?

(ii) 'करिष्यामि' पदे कः धातुः अस्ति ?

(iii) 'प्रतिदिनम् ....................कुर्वन्ति स्म।' इति वाक्ये क्रियापदस्य कर्तृपदम् किम् अस्ति ?

(iv) 'आकाशे' इति पर्यायवाचिपदम् किम् ?

---